दिनाङ्क : 17/01/2025 सायम् - 06:20

<u>मुख्यवार्ता:</u>

- **प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदिल्ल्यां भारत-मोबिलिटी-ग्लोबल-एक्सपो-इत्यस्य उद्घाटनम् कृतम्। तेन हरितप्रौद्योगिकी-मेक-इन-इण्डिया इत्युभाभ्याम् अभियानाभ्यां बलं प्रदत्तम्।**
- **आर्थिक-विषयक-केन्द्रीय-मन्त्रिमण्डलेन राष्ट्रिय-इस्पात-निगम-लिमिटेड इत्येतस्मै एकादश-सहस्रकोटिरूप्यकाणां पुनरुद्धार-सङ्ग्रहणाय स्वीकृति: प्रदत्ता।**
- **राष्ट्रपति: द्रौपदी मुर्मु: अद्य नवदिल्ल्यां राष्ट्रपतिभवने राष्ट्रिय-खेल-पुरस्कारान् प्रदत्तवती।**
- **विदेशमन्त्रालयेन सूचितं यत् भारतं बाङ्ग्लादेशेन सह मैत्रीपूर्णं सम्बन्धं वाञ्छतीति।**
- **पाकिस्तानदेशस्य पूर्वप्रधानमन्त्रिणे इमरानखानाय अलकादिर-ट्रस्ट इत्यनेन सम्बद्धे भूम्यावण्टन-भ्रष्टाचारप्रकरणे चतुर्दशवर्षाणां कारावासदण्ड: श्रावित:।**
- **ऑस्ट्रेलिया-ओपन-टेनिस-प्रतिस्पर्धायां भारतीय: क्रीडक: रोहनबोपन्ना: चीनदेशीयेन क्रीडकेन झांग-शुआई इत्येतेन सह मिश्रितयुगल-द्वन्द्वीये चक्रे समाविष्टवान्।**

**प्रधानमन्त्री-एक्सपो-इण्डिया**

प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदिल्ल्यां भारतमोबिलिटी-ग्लोबल-एक्सपो-इत्यस्य उद्घाटनम् कृतम्। तेन हरितप्रौद्योगिकी-मेक-इन-इण्डियेति अभियानेन सह प्रशासनस्य समर्थनविषयादिषु बलं ददता मोबिलिटीति जङ्गमक्षेत्रे निवेशस्थलत्वेन भारतस्य सम्भावनानां समुल्लेखो विहित:।

प्रधानमन्त्रिणा विषयोऽयं सबलं प्रतिपादित: यत् मोबिलिटीति क्षेत्रे उज्ज्वलभविष्याकाङ्क्षिभ्य: निवेशकेभ्य: भारतदेश: एक: उत्तम: गन्तव्य: अस्तीति। वर्षेऽस्मिन् भारत-मोबिलिटी-एक्स्पो इत्यस्य विस्तार-विषये प्रकाशं पातयन् श्रीमोदी अवदत् यत् गतवर्षे अष्टशताधिकै: प्रदर्शकै: भागो भजित:, सार्धैकलक्षाधिकैश्च जनै: एक्सपो इत्यस्य परिभ्रमणं कृतमासीत्।

भारत-मोबिलिटी-ग्लोबल-एक्सपो इत्यस्य विषयोऽस्ति-**सीमापार-भविष्यस्य आटोमोटिव-मूल्य-शृंखलाया: सह निर्माणमिति**। समागमेऽस्मिन् अस्य मासस्य एकोन-विंशदिनाङ्कत: द्वाविंशति- दिनाङ्कपर्यन्तं सर्वेभ्य: आगन्तुकेभ्य: नि:शुल्क-प्रवेशो विद्यते। आयोजनञ्च नवदिल्ल्या: भारतमण्डपम् इत्यत्र वर्तते।

<u>**राष्ट्रपति: द्रौपदीमुर्मु:**</u>

राष्ट्रपति: द्रौपदीमुर्मु: अद्य नवदिल्ल्याम् राष्ट्रपतिभवने चतुर्विंशत्यधिकद्विसहस्रतमवर्षस्य राष्ट्रिय-खेल-पुरस्कारान् प्रदत्तवती। विश्व-चतुरङ्ग-विजेता डी. गुकेशः, पेरिस-ओलिम्पिक्-क्रीडायां पदकद्वयविजेत्री मनुभाकरः, पुरुष-हाकी-दलनायकः हरमनप्रीतसिंह: पेरिस-पैरालम्पिक्-क्रीडायां स्वर्णपदकविजेता प्रवीणकुमारः च प्रतिष्ठितेन मेजर्-ध्यान-चन्द-खेल-रत्न-पुरस्कारेण अलङ्कृताः अभवन्। अवधेयम् वर्तते यत् क्रीडाक्षेत्रे चतुर्षु वर्षेषु क्रीडकस्य अद्भुतस्य उत्कृष्टस्य च प्रदर्शनस्य कृते अयं पुरस्कारः प्रदीयते। पैरा -शूटिङ्ग्-प्रशिक्षकः सुभाष- राणा, लक्ष्यभेदकक्रीडा-प्रशिक्षकः दीपाली देशपाण्डे:, हाकी-प्रशिक्षकः सन्दीप- साङ्ग्वानः बैडमिण्टन्-प्रशिक्षकः एस्. मुरलीधरन इत्येषः पादकन्दुक -प्रशिक्षकः अरमान्दो अग्नेलो कोलाको च प्रतिष्ठितेन द्रोणाचार्यपुरस्कारेण सम्मानिताः। अपरत्र अर्जुनपुरस्कारः द्वात्रिंशत् क्रीडकेभ्यः प्रदत्त। अवधेयम् वर्तते यत् अर्जुनपुरस्कारप्राप्तक्रीडकेषु क्रीडिका ज्योति-याराजी तथा च अन्नु-रानी, मुष्टामुष्टि- पदक विजेत्र्यौ नीतु स्वीटी इत्येषा च चतुरङ्ग-क्रीडकः वाण्टिका अग्रवाल: हाकी-क्रीडका: सलीमा टेटे, अभिषेक:, सञ्जय:, जर्मानप्रीत् सिङहः सुखजीत-सिंहः च सन्ति। चण्डीगढ-विश्वविद्यालयः खेलो-इण्डिया-विश्वविद्यालय-क्रीडासु समग्रतया सर्वोच्चं प्रदर्शनं कुर्वन् विश्वविद्यालयः इति मौलाना अबुल्-कलाम्-आज़ाद् (माका) इति पुरस्कारम् अवाप्नोत्।

**विदेशमन्त्रालय-सूचना**

रूसदेशस्य सेनायां सेवारता: आहत्य द्वादशसङ्ख्यका: भारतीया: सङ्घर्षे दिवङ्गताः साम्प्रतं यावत् षोडशजनाः विलुप्ताः सन्ति। अद्य नवदिल्ल्यां वार्ताहरान् सूचयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः संसूचयत् यत् केरल-वास्तव्यस्य बिनिल-बाबू-इत्यस्य मृत्युः दुर्भाग्यपूर्णास्ति मन्त्रालयेन च तस्यपरिवारं प्रति शोकः प्रकटितः। श्रीजायसवाल: प्रोक्तवान् यत् साम्प्रतं यावत् सेनायां सेवारता: षण्णवतिभारतीय-नागरिका: भारतदेशं प्रत्यागतवन्त:, अपि च रूसदेशीयेन सेनया तेभ्य: अवकाश: प्रदत्त:। बाङ्ग्लादेशस्थितै प्रवदन् प्रवक्ता कथितवान् यत् भारतं बाङ्ग्लादेशेन सह मैत्रीपूर्णं सम्बन्धं वाञ्छतीति।

**प्रधानमन्त्री-स्वामित्व-योजना**

प्रधानमन्त्री नरेन्द्रमोदी श्व: दृश्यश्रव्य परान्तर्जालीय-प्रणाल्या स्वामित्व-योजनाया: अन्तर्गतं दशराज्यानां द्वयो: केन्द्रशासितप्रदेशयो: च पञ्चाशत्सहस्राधिकं ग्रामेषु सम्पदाधीशेभ्य: पञ्चषस्टिलक्षाधिकं यावत् सम्पत्ति-पत्राणि वितरिष्यति।

**शाह/म०/प्र०/विधय:**

केन्द्रीय-गृहमन्त्री अमितशाह: अद्य मध्यप्रदेशे नूतानानाम् आपराधिक-त्रयाणां विधीनां क्रियान्वयनस्य समीक्षाम् अकरोत्। मध्यप्रदेशस्य मुख्यमन्त्रिण: मोहन-यादवस्य नेतृत्वे समागतेन एकेन प्रतिनिधिमण्डेन सह गृहमन्त्री, नवदिल्ल्याम् उपवेशनम् अकरोत्। उपवेशनेऽस्मिन् गृहसचिवेन गोविन्दमोहनेन सह अन्ये वरिष्ठाधिकारिणश्च उपस्थिता: आसन्।

**नेतन्याहू:-सङ्धर्षविराम:**

इजराइलदेशीयेन प्रधानमन्त्रिणा बेंजामिन-नेतन्याहू: अद्य पुष्टि: कृता यत् इजराइल-हमासयो: मध्ये कतर देशे गहनवार्तानन्तरं बन्धकानां विभुक्तये अथ च गाजा क्षेत्रे युद्ध-विरामस्य कार्यान्वयनाय एका सन्धि: प्रख्यापिता। पञ्चदशमासेभ्य: प्रचल्यमानस्य सङ्घर्षस्य विरामदिशि अयं महत्वपूर्णपदक्षेपो वर्तते। इजराइल-देशेन गृहीतानां फिलिस्तीन-देशीयनां बन्धकानां विनिमयरूपेण हमाससमूहेन गृहीतानां द्वादश बन्धकानां विमोचनं भविष्यति इति।

**पुणे-नासिकराजमार्ग-दुर्घटना**

महाराष्ट्रे अद्य प्रात: पुणे-नासिक-राजमार्गे जातायाम् एकस्यां मार्ग-दुर्घटनायां न्यूनतिन्यूनं नवजना: दिवङ्गता:। इयं दुर्घटना तदा घटिता यदा एकं टैम्पोवाहनं एकेन मिनीवैन इत्याख्येन वाहनेन दुर्घटितम्। पुणेग्रामीणस्य आरक्षि-अधीक्षक: पङ्कज-देशमुख: सूचितवान् यत् मिनीवैन इति वाहनं नारायणगांवनगरं प्रति गच्छद् आसीत्।

**इमरानाय दण्ड:**

पाकिस्तानदेशस्य पूर्वप्रधानमन्त्रिणे इमरानखानाय अलकादिर-ट्रष्ट इत्यनेन सम्बद्धे भूम्यावंटन-भ्रष्टाचारप्रकरणे चतुर्दशवर्षाणां कारावासदण्ड: भ्रष्टाचार निरोधी-न्यायालयेन श्रावित:। अनेनैव सह तस्य भार्यायै बुशरा बीबी इत्यस्यै च सप्तवर्षाणां कारावासदण्ड: श्रावित:। दण्डोऽयं नवत्युत्तरैकशत-मिलियन-पाउण्ड-परिमितस्य प्रवञ्चना प्रकरणे भ्रष्टाचार विरोधि-न्यायालयस्य न्यायाधिकारिणा नासिर-जावेद-राणा इत्यनेन श्रावित:। क्रिकेटक्रीडकात् जननेतृत्व-क्षेत्रे समागत: इमरामनखान: त्रयोविंशत्यधिकद्विसहस्र-वर्षस्य अगस्तमासात् कारावासे एव अस्ति।

**ऑस्ट्रेलिया- ओपन-टेनिस्-क्रीडा**

ऑस्ट्रेलिया-ओपन-टेनिस-प्रतिस्पर्धायां भारतीय: क्रीडक: रोहनबोपन्ना: स्वव्समकक्षेण चीनदेशीयेन क्रीडकेन झांग-शुआई इत्येतेन सह मिश्रितयुगल-द्वन्द्वीये चक्रे समाविष्टवान्। अनेन युग्मेन प्रथम चक्रे क्रोएशिया-फ्रांसदेशयो: इवान डोडिण क्रिस्टीना-म्लदिनोविच इत्यतौ षड्चत्वारि इत्यङ्कान्तरालेन पराजितौ।

**।। इति वार्ता:।**